**दिनाङ्क :- 12.08.2025**

**प्रात: - 06:55**

**<u>संसद विधेयकः</u>**

संसदा चतुर्विंशत्युत्तर द्विसहस्र तमवर्षस्य मर्चेण्ट्-शिप्पिङ्ग्-विधेयकं पारितम्, राज्यसभायां गतदिने तस्य अनुमोदनं कृतम्। एतत् विधेयकं मर्चेण्ट्-शिप्पिङ्ग्-आक्ट् अष्ट पंचाशतधिक नवदश इत्यस्य स्थाने प्रवर्तयिष्यते। एतत् विधेयकं मर्चेण्ट्-शिप्पिङ्ग्-सम्बद्ध विधिं संशोधयति येन भारतपक्षस्य समुद्रीय-सन्धेः अन्तर्गतम् अन्ताराष्ट्रिय-उपकरणानां च अन्तर्गतं देशस्य दायित्वस्य अनुपालनं सुनिश्चितं भवति। एतेन भारतीय-नौवहनस्य विकासः अपि सुनिश्चितः भविष्यति।

संसदा गोवाराज्यस्य विधानसभाक्षेत्रेषु अनुसूचितजनजातीनां प्रतिनिधित्वस्य पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य पुनर्समायोजनविधेयकं राज्यसभायाम् ह्यः अनुमोदनानन्तरं पारितम्। गतसप्ताहे लोकसभायाम् एतत् विधेयकं पारितम् आसीत्।

**<u>नितिन गडकरी</u>**

केन्द्रीय-मार्ग-परिवहन-राजमार्ग- मन्त्री नितिन गडकरी वर्यः अवदत् यत्, यदि जैव-इन्धनानां, हरित-हैड्रोजन्-इत्यस्य च उत्पादनं उपयोगं च वर्धते तर्हि भारतं ऊर्जा-निर्यातं कुर्वन् देशः भवितुम् अर्हति इति। श्री गड्करी वर्यः ह्यः विश्व-जैव-इन्धन-दिवसस्य स्मरणार्थं पुणे-नगरे 'बायोवर्स्' इति उपक्रमस्य उद्घाटने भाषणं कुर्वन् आसीत्। गड्करी इत्यस्य मतानुसारं, जैव-इन्धन-क्रान्तिः आयातस्य न्यूनीकरणे, ग्रामीण-अर्थव्यवस्थायाः प्रोत्साहने च महत्त्वपूर्णां भूमिकां निर्वहति। सः अवदत् यत् केवलं शर्करा-उत्पादनम् आश्रित्य भवितुं न शक्यते, परन्तु शर्करा-उद्योगः इथेनाल्, जैव-इन्धनानि, हरित-हैड्रोजन् इत्येतेषु अधिकं ध्यानं स्थापयेत् इति। सः स्वच्छ-इन्धनानां उत्पादने अधिकं शोधस्य आवश्यकतायां अपि अवधानम् अयच्छत्।

## 'हर-घर-तिरङ्गा'

स्वतन्त्रतायाः अमृत महोत्सवे 'हर-घर-तिरङ्गा' इति अभियानेन सम्पूर्णे महाराष्ट्रे उत्साहपूर्णः सहभागः दृश्यते। नासिक्-नगरे, नगरनिगमेन राजीवगान्धीभवने विशालः मानवशृङ्खला, विशालः राष्ट्रध्वजप्रदर्शनं च आयोजितम् आसीत्, यत्र छात्राः, शिक्षकाः, नागरिकाः सम्मिलिताः आसन्। अत्रान्तरे सिक्किम्-नगरे राष्ट्रिय-प्रौद्योगिकी-संस्थया ह्यः तिरङ्गा-सभा आयोजिता। चतुः शताधिकाः प्रतिभागिनः राष्ट्रध्वजं वहन् देशभक्ति- उद्घोषं च अकुर्वन्।

## विदेशमन्त्रालय-पाकः-

विदेशमन्त्रालयस्य प्रवक्ता रणधीरजयसवालः एकस्मिन् वक्तव्ये उक्तवान् यत् पाकिस्तानस्य सेनाप्रमुखस्य असीम मुनीरेत्यस्य सम्भाव्यपरमाणु समाह्वान विषये कृतायाः टिप्पण्याः भारतेन निन्दा कृता।

## विश्व-गज-दिवसः

विश्व-गज-दिवसः प्रतिवर्षं अगस्त-मासस्य द्वादश दिनाङ्के आचर्यते। पृथिव्यां अत्यन्तं भव्यजीवेषु एकस्य रक्षणार्थं संरक्षणार्थं च दिवसोऽयं आचर्यते। अद्य तमिळुनाडुराज्यस्य कोयम्बत्तूर्-नगरे 2025 तमवर्षस्य विश्व-गज-दिवसस्य राष्ट्रिय-उत्सवः आचर्यते।

## ऋतुविभागः

भारतीय-ऋतुविज्ञान-विभागेन अद्य हिमाचल-प्रदेशे, हिमालयीय-पश्चिमबङ्गे, सिक्किमे, उत्तराखण्डे च अतिवृष्टेः सञ्चेतना प्रसारितास्ति।

ऋतुविभागेन अरूणाचलप्रदेशे, असमराज्ये, मेघालये, बिहारराज्ये पूर्वमध्यप्रदेशे च अत्यधिवृष्टिः भविष्यति इति पूर्वानुमानं प्रकृटितम्।

सहैव उत्तराखण्डे उत्तरकाशीमण्डलस्य धाराली-हर्षिल-ग्रामयोः प्राकृतिक आपदायाः एकसप्ताहस्य अनन्तरम् अपि अन्वेषण-सहायोद्धार कार्यक्रमाः प्रचलन्ति। सम्प्रति दिल्ल्यां अपि वृष्टिः प्रवर्तते। ॥